# संस्कृतवार्ताः

**दिनाङ्कः - 22.11.2024** **सायम्  - 06:20**

**मुख्यवार्ताः**

- राष्ट्रपतिः द्रौपदीमुर्मुः  विकसितराष्ट्रं निर्मातुं राष्ट्र-प्रथमम् इत्येतस्य दृष्टिकोणस्य स्वीकरणस्य आवश्यकतायाः उपरि अवधानं दत्तवती।
- प्रधानमन्त्री नरेन्द्रमोदी नाइजीरिया-ब्राजील-गयाना-देशानां यात्रावधौ एकत्रिंशत् विश्व-नेतृभि: संघटनप्रमुखै: च साकम् अनेकानि द्विपक्षीयोपवेशनानि विहितवान्।
- झारखण्ड-महाराष्ट्रयो: विधानसभा-निर्वाचनै: सह विभिन्न-राज्यानां अष्टचत्वारिंशत्-विधानसभासनानां द्वयो: संसदीयक्षेत्रयो: च उपनिर्वाचनस्य श्व: भविष्यमाणाया: मतगणनाया: सर्वा: सज्जता: सम्पूरिता:।
- गृहमन्त्रिणा  अमितशाहेन निगदितं यत् अपराधस्य विरुद्धं प्रशासनस्य "शून्य-सहिष्णुतायाः  नीतिः अस्ति, तथा च दिल्ल्याः  विधि-व्यवस्थायाः स्थितौ कस्यापि प्रकारस्य शैथिल्यम् न  स्वीक्रियते इति।
- क्रिकेट-प्रतिस्पर्धायाम्, ऑस्ट्रेलियादलेन पर्थस्थले बॉर्डर-गावस्कर-ट्रॉफी प्रतियोगिताया: प्रथमायां निकषस्पर्धायां भारतं विरुध्य प्रथमे पर्याये सप्तक्रीडकानां हानि: पुरस्सरं सप्तषष्टि: धावनाङ्का: निर्मिता:।

**अथ वार्ताः विस्तरेण**

**राष्ट्रपतिः द्रौपदीमुर्मुः**

अद्य राष्ट्रपतिः द्रौपदीमुर्मुः  विकसितराष्ट्रं निर्मातुं राष्ट्र-प्रथमम् इत्येतस्य दृष्टिकोणस्य स्वीकरणस्य आवश्यकतायाः उपरि अवधानं दत्तवती। हैदराबाद-नगरे लोक-मन्थनस्य चतुर्थं संस्करणं सम्बोधयन्ती राष्ट्रपतिः सबलं प्रतिपदितवती यत् सर्वै: नागरिकै: देशस्य सांस्कृतिकं बौद्धिकं च परम्परां अवगन्तुं, अस्माकं अमूल्यपरम्पराणां सुदृढीकरणं च करणीयम्  इति।

वैविध्यं देशस्य मूलभूत-एकतायै सौन्दर्यस्य इन्द्रधनुः प्रददाति इति कथयित्वा राष्ट्रपतिः अवदत् यत्, राष्ट्रिय-एकतायाः अनुभूतेः कारणात् अनेकप्रतिसन्धिषु अपि देशः एकीकृतः अस्ति इति। राष्ट्रपतिः मुर्मुः स्मारितवती   यत् भारतीयसमाजस्य विभाजनं दुर्बलं च कर्तुं शताब्द्याः प्रयत्नः जात:। सा अवोचत् यत् कृत्रिम-भेदः प्राकृतिक-ऐक्यं विच्छिन्नं कर्तुं न शक्नोति तथा च भारतीयतायाः चेतनया प्रेरिताः नागरिकाः राष्ट्रिय-एकतायाः दीपं स्थापयन्ति इति।

हैदराबाद्-नगरस्य द्विदिवसीय-यात्राया: अनन्तरं राष्ट्रपतिः नवदिल्लीं प्रति प्रस्थितवती।

**प्रधानमन्त्री-यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी पञ्चदिवसानां नाइजीरिया-ब्राजील-गयाना-देशानां यात्रावधौ अनेकै: विश्व-नेतृभिस्साकम् अनेकानि द्विपक्षीयोपवेशनानि विहितवान्। अत्रावधौ प्रधानमन्त्री एकत्रिंशत्-द्विपक्षीयोपवेशनेषु भागम् अभजत्। अपि च वैश्विकनेतृभिस्सह अनौपचारिकीं वार्तामपि कृतवान्। श्रीमोदी नाइजीरियादेशे एकं ब्राजीलदेशे दश गयानायां च नव द्विपक्षीयोपवेशनानि समनुष्ठितवान्। प्रधानमन्त्री इण्डोनेशियाया: राष्ट्रपतिना प्रबोवो-सुबियान्टो इत्यनेन पुर्तगालस्य प्रधानमन्त्रिणा लुइस-मोंटेनेग्रो इत्यमुना ब्रिटेनदेशीयेन प्रधानमन्त्रिणा कीर-स्टार्मर इत्यनेन चिलीदेशीयेन राष्ट्रपतिना ग्रेबियल-बोरिक इत्यमुना अर्जेन्टीना-देशस्य राष्ट्रपतिना जेवियर-माइली इत्येतेन च सह अनेकानि उपवेशनानि कृतवान्। एतदतिरिच्य असौ सिंगापुर-दक्षिणकोरिया-मिस्र-अमरीका-स्पेन-देशनां विभिन्नानाम् अन्ताराष्ट्रिय-सङ्घटनानां प्रमुखै: अधिकारिभि: च सह मन्त्रणाम् उपवेशनानि च विहितवान्।

## विधानसभानिर्वाचनम्

झारखण्ड-महाराष्ट्रयो: विधानसभा-निर्वाचनै: सह विभिन्न राज्यानां अष्टचत्वारिंशत्-विधानसभासनानां केरलस्य वायनाड-संसदीयक्षेत्रस्य महाराष्ट्रस्य नांदेड-संसदीयक्षेत्रस्य च उपनिर्वाचनस्य श्व: भविष्यमाणाया: मतगणनाया: सर्वा: सज्जता: सम्पूरिता:। मतगणना प्रात: अष्टवादने आरप्स्यते। सर्वप्रथमं प्रैष्य-मतपत्राणां गणना भविष्यति। मतगणना-प्रक्रियाया: सुचारू-सञ्चालनाय निर्वाचनायोगेन व्यापकव्यवस्था कृता। विभिन्न-राज्यानाम् एकत्रिंशत्-विधानसभासनेषु केरलस्य वायनाड-संसदीयक्षेत्रे च उपनिर्वाचनं नवम्बरमासस्य त्रयोदश-दिनाङ्के अभवत्। महाराष्ट्रस्य-पञ्चदश-विधानसभासनेषु नांदेड-संसदीय-क्षेत्रे च अस्य-मासस्य विंशति दिनाङ्के मतदानं सम्पन्नम्।

## विराम:

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

## अमितशाह:

गृहमन्त्रिणा अमितशाहेन निगदितं यत् अपराधस्य विरुद्धं प्रशासनस्य "शून्य-सहिष्णुतायाः नीतिः अस्ति, तथा च दिल्ल्याः विधि-व्यवस्थायाः स्थितौ कस्यापि प्रकारस्य शैथिल्यम् न स्वीक्रियते इति। गृहमन्त्री अद्य दिल्ली-आरक्षकैः सह मेलनं कृत्वा विधि-व्यवस्थायाः स्थितिं समीक्षितवान्। केन्द्रीयगृहसचिवः गोविन्दमोहनः, गुप्तचरविभागस्य निर्देशकः तपन डेका: दिल्ली-आरक्षि-आयुक्तः, अन्ये च वरिष्ठाः अधिकारिणः अस्याम् सभायां उपस्थिताः आसन्। श्रीशाह: अवोचत् यत् दिल्लीवासिनः पूर्णतया सुरक्षाम् अनुभवन्तु इति प्रत्येकस्य आरक्षकस्य व्यक्तिगतं दायित्वम् अस्ति इति। सः इत्यपि अवदत् यत् बालकानां, महिलानां, वरिष्ठनागरिकाणां च सुरक्षां दिल्ली-आरक्षिबलानां प्राथमिकता भवेत् इति।

## रक्षामन्त्री

रक्षामन्त्री राजनाथसिंह: अद्य लाओस-देशस्य राजधान्यां वियनतियाने नगरे जापानदेशस्य रक्षामन्त्रिणा जनरल-निकातानि इत्येतेन सह मेलनं कृतवान्। एकस्मिन् सामाजिकसन्देशपटले श्रीसिंह: अवोचत् यत् जनरल-निकातानी इत्यमुना सह तस्य चर्चा समुचितासीत्। विश्वासं च प्रकटितवान् यत् उभयो: देशयो: मध्ये इयं सहभागिता स्वतन्त्र-मुक्त-नियमाधारितं हिन्द- प्रशान्तक्षेत्रं सुनिश्चितुं महत्वपूर्णभूमिकां निर्वक्ष्यति। उभौ पक्षौ देशयो: मध्ये रक्षा-उद्योग-प्रौद्योगिक-सहयोगानां महत्वं पुनरावर्तितवन्तौ। श्रीसिंहेन फिलीपींस-देशस्य रक्षासचिवेन गिल्बर्टो-टेओडोरो-इत्यमुना साकमपि सम्मेलनं कृतम्। असौ प्रोक्तवान् यत् भारतं फिलीपींस-देशेन सह रक्षासहकार्यं प्रबलीकर्तुं प्रतिबद्धमस्ति इति।

## नड्डा-खरगे-मणिपुर

भाजपाध्यक्ष: जे पी नड्डा: कांग्रेसं प्रति आक्षेपं कृतवान् यत् दलेन मणिपुरस्य-संवेदनात्मक-स्थिति: यथावदेव न संस्थापिता। श्रीनड्डा: मणिपुरस्य हिंसासम्बद्धे कांङ्ग्रेसाध्यक्षेण मल्लिकार्जुन-खरगे इत्यनेन लिखितस्य पत्रस्य प्रत्युत्तरं राष्ट्रपति-पदासीनायै द्रौपदी-मुर्मु-वर्यायै प्रदत्तवान्। असौ स्वपत्रे लिखितवान् यत् विगत-दशवर्षेषु प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे पूर्वोत्तर-क्षेत्रेषु सम्यक्-परिवर्तनं सञ्जातम्। श्रीनड्डा इत्यस्य पत्रस्य प्रत्युत्तरे कांग्रेसनेता जयरामरमेश: कथितवान् यत् मणिपुरस्य जना: शीघ्रातिशीघ्रं सामान्यस्थिते:, शान्ते: सद्भावस्य च कामनां कुर्वन्ति इति।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी आगामि-रविवासरे एकादशवादने स्वीये "मन की बात" इत्यस्मिन कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं षोडशाधिक-एकशततमं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणं आकाशवाणी-दूरदर्शनयो: सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं भविष्यति।

## क्रिकेट्

क्रिकेट-प्रतिस्पर्धायाम्, ऑस्ट्रेयिादलेन पर्थस्थले बॉर्डर-गावस्कर-ट्रॉफी प्रतियोगिताया: प्रथमायां निकषस्पर्धायां भारतं विरुध्य प्रथमे पर्याये सप्तक्रीडकानां हानि: पुरस्सरं सप्तषष्टि: धावनाङ्का: निर्मिता:।

**।।इति वार्ता:।।**